|| श्री गणेशाय नमः ||

# हरी ॐ धार्मिक पूजा विधी केंद्र

## ज्योतिष आणि वास्तु सल्लागार

Astro • Puja • Vastu

# || रूद्र-सूक्तम् ||

नमस्ते रुद्र मन्यवऽ उतो तऽ इषवे नमः। बाहुभ्याम् उत ते नमः ||1||

या ते रुद्र शिवा तनूर-घोरा ऽपाप-काशिनी । तया नस्तन्वा शन्तमया गिरिशंताभि चाकशीहि ||2||

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिन्सीः पुरुषं जगत् ||3||

शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज् जगद-यक्ष्मम् सुमनाऽ असत् ||4||

अध्य वोचद-धिवक्ता प्रथमो दैव्यो भिषक् । अहींश्च सर्वान जम्भयन्त् सर्वांश्च यातु-धान्यो ऽधराचीः परा सुव ||5||

असौ यस्ताम्रोऽ अरुणऽ उत बभ्रुः सुमंगलः । ये चैनम् रुद्राऽ अभितो दिक्षु श्रिताः सहस्रशो ऽवैषाम् हेड ऽईमहे ||6||

असौ यो ऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपाऽ अदृश्रन्न् दृश्रन्नु-दहारयः स दृष्टो मृडयाति नः ||7||

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो येऽ अस्य सत्वानो ऽहं तेभ्यो ऽकरम् नमः ||8||

प्रमुंच धन्वनः त्वम् उभयोर आरत्र्योर ज्याम् । याश्च ते हस्तऽ इषवः परा ता भगवो वप ||9||

विज्यं धनुः कपर्द्दिनो विशल्यो बाणवान्ऽ उत । अनेशन्नस्य याऽ इषवऽ आभुरस्य निषंगधिः||10||

या ते हेतिर मीढुष्टम हस्ते बभूव ते धनुः । तया अस्मान् विश्वतः त्वम् अयक्ष्मया परि भुज ||11||

परि ते धन्वनो हेतिर अस्मान् वृणक्तु विश्वतः । अथो यऽ इषुधिः तवारेऽ अस्मन् नि-धेहि तम् ||12||

अवतत्य धनुष्ट्वम् सहस्राक्ष शतेषुधे । निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ||13||

नमस्तऽ आयुधाय अनातताय धृष्णवे । उभाभ्याम् उत ते नमो बाहुभ्यां तव धन्वने ||14||

मा नो महान्तम् उत मा नोऽ अर्भकं मा नऽ उक्षन्तम् उत मा नऽ उक्षितम् ।

मा नो वधीः पितरं मोत मातरं मा नः प्रियास् तन्वो रूद्र रीरिषः ||15||

मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः ।

मा नो वीरान् रूद्र भामिनो वधिर हविष्मन्तः सदमित् त्वा हवामहे ||16||


## HARI OM DHARMIK PUJA VIDHI KENDRA

योगेशशास्त्री ढवळे (गुरुजी) : 95944 28749 | निलेशशास्त्री ढवळे (गुरुजी) : 86524 02078

**SANPADA OFFICE**
Office No.8, 1st Flr, Shiva Triveni Galleria CHS.,
Plot No. 13, Sector 8, Sanpada, Navi Mumbai

**GOVANDI OFFICE**
Shri Swaybhu Hanuman Mandir, Deonar
Mahanagarpalika Vasahat, Govandi, Mumbai.

hariom astrologers | hariom astrologers | hariom_astrologers

hariomastrologers@gmail.com | www.hariomastrologers.com